# Natya Shastra Chapter 30

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૩૦

## Document Information

Text title : naaTyashaastra adhyaaya 30

File name : natya30.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : hareshbakshi at hotmail.com

Proofread by : hareshbakshi at hotmail.com

Latest update : february 14, 2003

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Natya Shastra Chapter 30

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૩૦

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

ત્રિંશોઽધ્યાયઃ

અતોદ્યં સુષિરં નામ જ્ઞેયં વંશગતં બુધૈઃ ।
વૈણ એવ વિધિસ્તત્ર સ્વરગ્રામસમાશ્રયઃ ॥ ૧ ॥

દ્વિકત્રિકચતુષ્કાસ્તુ જ્ઞેયા વંશગતાઃ સ્વરાઃ ।
કમ્પ્યમાનાર્થમુક્તાશ્ચ વ્યક્તમુક્તાસ્તથૈવ ચ ॥ ૨ ॥

તત્રોપરિ યથા હ્યેકઃ સ્વરો વૈણસ્વરાન્તરે ।
પ્રાપ્નોત્યન્યત્વમેવેહ તથા વંશગતોઽપિ હિ ॥ ૩ ॥

દ્વિકસ્ત્રિકશ્ચતુષ્કો વા શ્રુતિસઙ્ખ્યો ભવેત્ સ્વરઃ ।
અનીરણાત્તુ શેષાણાં સ્વરાણામપિ સમ્ભવઃ ।
અઙ્ગુલીવાદનકૃતં તચ્ચ મે સન્નિબોધત ॥ ૪ ॥

વ્યક્તમુક્તાઙ્ગુલિસ્તત્ર સ્વરો જ્ઞેયશ્ચતુઃશ્રુતિઃ ।
કમ્પ્યમાનાઙ્ગુલિશ્ચૈવ ત્રિશ્રુતિઃ પરિકીર્તિતઃ ।
દ્વિકોઽર્ધાઙ્ગુલિમુક્તઃ સ્યાદિતિ શ્રુત્યાશ્રિતાઃ સ્વરાઃ ॥ ૫ ॥

એતે સ્યુર્મધ્યમગ્રામે ભૂયઃ ષડ્જાશ્રિતાઃ પુનઃ ।
વ્યક્તમુક્તાઙ્ગુલિકૃતાઃ ષડ્જમધ્યમપઞ્ચમાઃ ॥ ૬ ॥

ઋષભો ધૈવતશ્ચાપિ કમ્પ્યમાનાઙ્ગુલીકૃતૌ ।
અર્ધમુક્તાઙ્ગુલિશ્ચૈવ ગાન્ધારોઽથ નિષાદવાન્ ॥ ૭ ॥

સ્વરસાધારણશ્ચાપિ કાકલ્યન્તરસંજ્ઞયા ।
નિષાદગાન્ધારકૃતૌ ષડ્જમધ્યમયોરપિ ॥ ૮ ॥

વિપર્યયા સન્નિકર્ષે શ્રુતિલક્ષણસિદ્ધિતઃ ।

વૈણકણ્ઠપ્રવેશેન સિદ્ધા એકાશ્રિતાઃ સ્વરાઃ ॥ ૯ ॥

યં યં ગાતા સ્વરં ગચ્છેત્ તં તં વંશેન વાદયેત્ ।
શારીરવૈણવંશ્યાનામેકીભાવઃ પ્રશસ્યતે ॥ ૧૦ ॥

અવિચલિતમવિચ્છિન્નં વર્ણાલઙ્કારસંયુતં વિધિવત્ ।
લલિતં મધુરં સ્નિગ્ધં વેણોરેવં સ્મૃતં વાદ્યમ્ ॥ ૧૧ ॥

એવમેતત્ સ્વરગતં વિજ્ઞેયંગાનયોક્તૃભિઃ ।
અતઃ પરં પ્રવક્ષ્યામિ ઘનાતોદ્યવિકલ્પનમ્ ॥ ૧૨ ॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે સુષિરાતોદ્યલક્ષણં
નામાધ્યાયસ્ત્રિંશઃ ॥

Encoded by Haresh BakShi hareshbakShi at hotmail.com

*Natya Shastra Chapter 30*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*